শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে

# ॥ অষ্টসপ্ততিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ অষ্টসপ্ততিতমঃ সর্গঃ ॥

## রাৱণস্যাজ্ঞযা মকরাক্ষস্য যুদ্ধায প্রস্থানম্

নিকুম্ভং নিহতং শ্রুৎৱা কুম্ভং চ ৱিনিপাতিতম্।
রাৱণঃ পরমামর্ষী প্রজজ্ৱালানলো যথা॥ **6.78.1** ॥

নৈরৃতঃ ক্রোধশোকাভ্যাং দ্ৱাভ্যাং তু পরিমূর্চ্ছিতঃ।
খরপুত্রং ৱিশালাক্ষং মকরাক্ষমচোদযৎ॥ **6.78.2** ॥

গচ্ছ পুত্র মযাঽঽজ্ঞপ্তো বলেনাভিসমন্ৱিতঃ।
রাঘৱং লক্ষ্মণং চৈৱ জহি তৌ সৱনৌকসৌ॥ **6.78.3** ॥

রাৱণস্য ৱচঃ শ্রুৎৱা শূরমানী খরাত্মজঃ।
বাঢমিত্যব্রৱীদ্ধৃষ্টো মকরাক্ষো নিশাচরম্॥ **6.78.4** ॥

সোঽভিৱাদ্য দশগ্রীৱং কৃৎৱা চাপি প্রদক্ষিণম্।
নির্জগাম গৃহাচ্ছুভ্রাদ্ রাৱণস্যাজ্ঞযা বলী॥ **6.78.5** ॥

সমীপস্থং বলাধ্যক্ষং খরপুত্রোঽব্রৱীদ্ ৱচঃ।
রথমানীযতাং তূর্ণং সৈন্যং ৎৱানীযতাং ৎৱরাৎ॥ **6.78.6** ॥

তস্য তদ্ ৱচনং শ্রুৎৱা বলাধ্যক্ষো নিশাচরঃ।
স্যন্দনং চ বলং চৈৱ সমীপং প্রত্যপাদযৎ॥ **6.78.7** ॥

প্রদক্ষিণং রথং কৃৎৱা সমারুহ্য নিশাচরঃ।
সূতং সঞ্চোদযামাস শীঘ্রং ৱৈ রথমাৱহ॥ **6.78.8**॥

অথ তান্ রাক্ষসান্ সর্ৱান্ মকরাক্ষোঽব্রৱীদিদম্।
যূযং সর্ৱে প্রযুধ্যধ্ৱং পুরস্তান্মম রাক্ষসাঃ॥ **6.78.9**॥

অহং রাক্ষসরাজেন রাৱণেন মহাত্মনা।
আজ্ঞপ্তঃ সমরে হন্তুং তাৱুভৌ রামলক্ষ্মণৌ॥ **6.78.10**॥

অদ্য রামং ৱধিষ্যামি লক্ষ্মণং চ নিশাচরাঃ।
শাখামৃগং চ সুগ্রীৱং ৱানরাংশ্চ শরোত্তমৈঃ॥ **6.78.11**॥

অদ্য শূলনিপাতৈশ্চ ৱানরাণাং মহাচমূম্।
প্রদহিষ্যামি সম্প্রাপ্তাং শুষ্কেন্ধনমিৱানলঃ॥ **6.78.12**॥

মকরাক্ষস্য তচ্ছ্রুৎৱা ৱচনং তে নিশাচরাঃ।
সর্ৱে নানাযুধোপেতা বলৱন্তঃ সমাহিতাঃ॥ **6.78.13**॥

তে কামরূপিণঃ ক্রূরা দংষ্ট্রিণঃ পিঙ্গলেক্ষণাঃ।
মাতঙ্গা ইৱ নর্দন্তো ধ্ৱস্তকেশা ভযাৱহাঃ॥ **6.78.14**॥

পরিৱার্য মহাকাযা মহাকাযং খরাত্মজম্।
অভিজগ্মুস্ততো হৃষ্টাশ্চালযন্তো ৱসুন্ধরাম্॥ **6.78.15**॥

শঙ্খভেরীসহস্রাণামাহতানাং সমন্ততঃ।
ক্ষ্ৱেলিতাস্ফোটিতানাং চ তত্র শব্দো মহানভূৎ॥ **6.78.16**॥

প্রভ্রষ্টোঽথ করাৎ তস্য প্রতোদঃ সারথেস্তদা।
পপাত সহসা দৈৱাদ্ ধ্ৱজস্তস্য তু রক্ষসঃ॥ **6.78.17**॥

তস্য তে রথসংযুক্তা হযা ৱিক্রমৱর্জিতাঃ।
চরণৈরাকুলৈর্গৎৱা দীনাঃ সাস্রমুখা যযুঃ॥ **6.78.18**॥

প্রৱাতি পৱনস্তস্মিন্ সপাংসুঃ খরদারুণঃ।
নির্যাণে তস্য রৌদ্রস্য মকরাক্ষস্য দুর্মতেঃ॥ **6.78.19**॥

তানি দৃষ্টৱা নিমিত্তানি রাক্ষসা ৱীর্যৱত্তমাঃ।
অচিন্ত্য নির্গতাঃ সর্ৱে যত্র তৌ রামলক্ষ্মণৌ॥ **6.78.20**॥

ঘনগজমহিষাঙ্গতুল্যৱর্ণাঃ
সমরমুখেষ্ৱসকৃদ্গদাসিভিন্নাঃ।
অহমহমিতি যুদ্ধকৌশলাস্তে
রজনিচরাঃ পরিবভ্রমুর্মুহুস্তে॥ **6.78.21**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে অষ্টসপ্ততিতমঃ সর্গঃ॥